## ईडजनोर्ध्वे च । (७८/२४४०)

ईड जन इत्येताभ्यामुत्तरस्य ध्वे इत्येतस्य, स्ये इत्येतस्य च सार्वधातुकस्य इडागमो भवति । ईडिध्वे । ईडिध्वम् । ईडिषे । ईडिष्व । जनिध्वे । जनिध्वम् । जनिषे । जनिष्व । 'जनी प्रादुर्भावे' (धा. पा. ११४९) इत्यस्य छान्दसत्वात् श्यनो लुक्, उपधालोपाभावश्च । 'जन जनने' (धा.पा. ११०५) इत्यस्यापि श्लुविकरणस्य ग्रहणमत्रेष्यते । तस्य कर्मव्यतिहारे[1] व्यतिजज्ञिषे, व्यतिजज्ञिष्व, व्यतिजज्ञिध्वे, व्यतिजज्ञिध्वम् इति [2]च भवति ।

ध्वेशब्दे ईशेरपि इडागम इष्यते ईशिध्वे ईशिध्वम् इति । तदर्थं केचित् 'ईडिजनोः स्ध्वे च' इति सूत्रं पठन्ति । तत्र सकारादेः सेशब्दस्य सूत्र एवोपादानाच्चशब्दो [3]भिन्नक्रमः ईशेरनुकर्षणार्थो [4]विज्ञायते । [5]'ईशीडिजनां सेध्वयोः' इत्येकमेव सूत्रं न पठितम् ? विचित्रा हि सूत्रस्य कृतिः पाणिनेः इति । ध्वे इति कृतटेरेत्वस्य ग्रहणात् लङि ध्वमि न भवितव्यमिटा । लोटि [6]पुनरेकदेशविकृतस्य अनन्यत्वात् (व्या. प. १६) [7]भवितव्यमिटा ॥

## लिङः सलोपोऽनन्त्यस्य । (७९/२२११)

[8]सार्वधातुके इति वर्तते । सार्वधातुके यो लिङः [9]तस्य अनन्त्यस्य सकारस्य लोपो भवति । कः पुनरनन्त्यो लिङः सकारः ? यो यासुट्सुट्सीयुटाम्[10] । कुर्यात्, कुर्याताम्, कुर्युः । कुर्वीत, कुर्वीयाताम्, कुर्वीरन् । अनन्त्यस्य इति किम् ? कुर्युः । कुर्याः । सार्वधातुके इत्येव, क्रियास्ताम् । क्रियासुः । कृषीष्ट, कृषीयास्ताम्, कृषीरन् ॥

## अतो येयः । (८०/२२१२)

अकारान्तात् अङ्गादुत्तरस्य या इत्येतस्य सार्वधातुकस्य इय् इत्ययमादेशो भवति, पचेत्, पचेताम्, पचेयुः इति । अत्र 'उस्यपदान्तात्' (६.१.९६/१२१४) इति पररूपं बाधितम् । अतः इति किम् ? चिनुयात् । [11]सुनुयात् । तपरकरणम् किम् ? [12]यायात् । सार्वधातुक इत्येव, चिकीर्ष्यात्[13] ।

ननु च[14] 'अतो लोपः' (६.४.४८/२३०८) इत्यनेनात्र भवितव्यम्, पचेत् इत्यत्रापि हि तर्हि 'अतो दीर्घो यञि' (७.३.१०१/२१७०) इति दीर्घत्वेन भवितव्यम्, तदनेन अवश्यं विध्यन्तरं बाधितव्यम्, स यथैव [15]दीर्घस्य बाधकः एवम् अतो लोपस्यापि बाधकः स्यात् ? स्यादेतदेवं यदि [16]दीर्घः सार्वधातुके विधीयते । [17]अथ तु तिङि विधीयते, तदा येन नाप्राप्तिन्यायेन [18]दीर्घस्यैव बाधकः स्यान्न पुनरतो लोपस्य[19] । येयः इत्यविभक्तिको निर्देशः । यः इति वा षष्ठी[20]निर्देशे यलोपस्य असिद्धत्वमनाश्रित्य आद्गुणः (६.१.८७/६९) कृतः, [21]सौत्रत्वान् [22]निर्देशस्य इति । केचित् अत्र 'अतो यासियः' इति सूत्रं पठन्ति । तेषां सकारान्तः स्थानी, षष्ठीसमासश्च ॥

---

1. आत्मनेपदम् इत्यधिकम् ड. ह. 2. च नास्ति ब. 3. भिन्नक्रमः नास्ति ब. इ. 4. विधीयते ड. 5. इशीडजनां ड. क. 6. एकदेशविकृतमनन्यवद् भवति इति भवितव्यम् ब. 7. भवति क. 8. वाक्यमिदं नास्ति ब. 9. विहितः इत्यधिकम् क. 10. सम्बन्धी इत्यधिकम् ह. 11. नास्ति ब. ह. 12. पायात् ह. 13. चिकीर्ष्यास्ताम् चिकीर्ष्यासुः इत्यधिकम् क. इ. ड, जिहीर्ष्यात् इत्यधिकम् इ. 14. अत्र इत्यधिकम् क. 15. हि दीर्घत्वस्य क, दीर्घत्वं बाधते तथा ह. 16. दीर्घत्वम् इ. 17. वाक्यमिदं नास्ति ह. 18. दीर्घत्वस्यैव क. 19. अपि इत्यधिकम् क. 20. निर्देशः क. 21. सौत्रोऽयं निर्देशः इति ड. 22. निर्देशः ब.